# Shri Parshvanathajayamala

# શ્રીપાર્શ્વનાથજયમાલા

## Document Information

Text title : pArshvanAthajayamAlA

File name : pArshvanAthajayamAlA.itx

Category : deities_misc, jaina

Location : doc_deities_misc

Proofread by : DPD

Latest update : March 31, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2021

*sanskritdocuments.org*

# શ્રીપાર્શ્વનાથજયમાલા

અથ શ્રીપાર્શ્વનાથ જયમાલા ।

વન્દે તં જિનપાર્શ્વનાથમનઘં ! રત્નત્રયાલઙ્કૃતં
    હ્રીં બીજં મતિદુઃખદાવશમનં ઘોરોપસર્ગાપહમ્ ।
દેવેન્દ્રાધિપતિં ખગાધિપનતં વન્ધ્યાપિનારીસુતં
    પદ્મિનીસતિશાસનં ભયહરં નાગેન્દ્રસેવાન્વિતમ્ ॥ ૧॥

અમરનાથગણાધિપવન્દ્યં મુનિજનાર્યાસેવિતપાદમ્ ।
ભક્તિનમ્રભવસાગરપોતં વાક્યામૃતરસપોષિતભૂતમ્ ॥ ૨॥

કૃતોપસર્ગં કમઠૈર્રિષ્ઠં જિતવારાતિભવાન્તરશ્રેષ્ઠમ્ ।
કુણ્ડલકુણ્ડલિનીકૃતછત્રં વારિતમેઘાડમ્બરશસ્ત્રમ્ ॥ ૩॥

કર્મપર્વતહતાસમવજ્રં ભયતમવારણસૂર્યસુસજ્જં
કેવલજ્ઞાનવિલોકનદક્ષં બોધિતલોકાલોકવિપક્ષમ્ ॥ ૪॥

રાજિતસમવસરણસુનિધાનં ચામરછત્રસિંહાસનભાનમ્ ।
સુરાસુરખેચરતિષ્ઠતિ સૌખ્યં દ્વાદશભાસાહિતસન્મુખ્યમ્ ॥ ૫॥

ધર્મપ્રકાશિતલક્ષણસહિતં મૂલદયાનિધિપાપવિરહિતમ્ ।
જન્તૂત્તારણસમરથસૂરં ભવ્યકમલવાક્યામૃતપૂરમ્ ॥ ૬॥

દેવી પદ્માવતિ વામે વિશાલં રક્ષતુ શાસનમુખદ્રુમજાલમ્ ।
દક્ષિણદિશિ સોહૈ ફણિરાજં વિઘ્નનિવારણદેવવિરાજમ્ ॥ ૭॥

ઈદૃગ્ વિધિ પાર્શ્વજિનં પ્રણમ્યં અનન્તચતુષ્ટયગમ્યાગમ્યમ્ ।
યે નરનારિ ત્રિકાલં પૂજન્તિ તે મન વછિત સફલ લહન્તિ ॥ ૮॥

નાગ નાગિણી અતિશય ધારી ઉધર્યા દમ્પતી જનસુખકારી ।
ક્ષધોરઘનદુઃખનિવારી વઞ્છિતફલ અતિદાયક ભારી ॥ ૯॥

ધત્તા (માલિનીં ! )

આપદ્વિવિધહારી સમ્પદાસૌખ્યકારી
ત્રિભુવનપદધારી સિદ્ધિલોકાગ્રસૂરી ।
જલબહુવિધપૂરૈર્ગન્ધમાલ્યાદિસારૈ-
જિનવરમુખબિમ્બં પૂજિતં ભાવભકયા ॥ ૯॥

ૐ હ્રીં ક્રૌઁ મહાર્થમ્ ॥

ઇતિ શ્રીપાર્શ્વનાથ જયમાલા સમ્પૂર્ણા ।

Proofread by DPD

*Shri Parshvanathajayamala*

pdf was typeset on December 3, 2021

Please send corrections to *sanskrit@cheerful.com*